International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(5): 57-59
© 2026 IJMH
www.themultijournal.com
Received: 05-09-2026
Accepted: 25-09-2026
Publish : 26-09-2026

**Dr.S.Sitarama Rao**
Asst.Professor,
Sri Venkateswara Vedic University,
Tirupati.

**Correspondence:**
**Dr.S.Sitarama Rao**
Asst.Professor,
Sri Venkateswara Vedic University,
Tirupati.

# अतिथि-सत्कार वैशिष्ट्यम्

**Dr.S.Sitarama Rao**

प्राचीन-भारते कुत्रापि समानरूपेण सम्मानितः भारतीय-संस्कृतेः कश्चित् महत्त्वपूर्णः आचारः कः इति कश्चित् पृच्छेत् चेत्, निस्संशयं **"अतिथि-सत्कारः"** अथवा अतिथेः आदरः इति उत्तरं वक्तुं शक्यते।

अयमाचारः न केवलं रामायण-महाभारत-अष्टादश-पुराण-धर्मसूत्र-गृह्यसूत्र-स्मृति साहित्येषु, अपितु जैन-बौद्ध-साहित्येषु अपि महता धर्मरूपेण प्रशंसितः।

प्राचीन-भारतीय जनानां मध्ये अतिथि-सत्कारस्य भावना एतावती दृढा आसीत् यत् अतिथिम् आहूय आदरयितुं सामान्यं सामाजिक-कर्तव्यं न भूत्वा धार्मिक-कर्तव्यम् इति मन्यते स्म। अधिकं च, अतिथये भोजन-दानं नाम **"अतिथि-यज्ञः"** गृहस्थेन प्रतिदिनम् आचरणीयेषु पञ्चमहायज्ञेषु अन्यतमः इति गण्यते स्म।

अस्य आचारस्य प्रशंसकाः बहवः कथाः, उदाहरणानि च भारतीय-साहित्ये दृश्यन्ते।

अस्मिन् निबन्धे अस्माभिः विचारणीयः विषयः अयम् अस्ति - अतिथि-सत्कारः नाम धर्मः परवर्तिकाले जातः उत **"वेदोऽखिलो धर्म मूलम्"** (म.स्मृ 2-6) इति सिद्धान्तानुसारम् अस्य मूलानि वैदिक-साहित्ये एव सन्ति वा ?

उपर्युक्त-साहित्येषु अतिथि-सत्कार-विधानस्य प्रमाणत्वेन श्रुति-स्मृति-पुराणेषु वारं वारं उद्घ्रियन्ते। यथा महाभारते उक्तम् -

**"अध्यपूर्वेण विधिना वेदोक्तेनाभ्यर्च्य पूजयेत्"** (म.भा.12-327-2)

अर्थात् वेदैः निर्दिष्टेन विधिना अतिथिं सत्कर्तव्यम् इति भावः।

अतः वेदेषु अतिथि-सत्कार-सम्बन्धीनि प्रमाणानि कानि? तैः तस्य कालस्य समाजस्य स्वरूपं कथं ज्ञायते इति विषयौ अस्मिन् निबन्धे परीक्षणीयौ।

ऋग्वेदः उपलब्धेषु वैदिक-साहित्येषु प्राचीनतमः इति प्रसिद्धः। ऋग्वेदस्य विविध-मण्डलेषु "अतिथि" इति पदं पञ्च चत्वारिंशत् वारान् दृश्यते। अधिकेषु प्रसङ्गेषु इदं पदं अग्निदेवस्य विशेषणत्वेन उपमात्वेन वा प्रयुक्तम्। **विश्वेषामतिथिर्मानुषाणाम्** (ऋ -4-1-20)

यास्काचार्यः "अतिथि" इति पदं "अत्" (अत् सातत्यगमने) इति धातोः निष्पन्नम् इति सतत गमनः शीलः विवृणोति। अतः इति अर्थः भवति। अपरमतेन, " अतिथिरभ्यतितो गृहान् भवति अभ्येति तिथिषु परकुलनि इति वा गृहाणि इति वा" पौर्णमास्यां दिने ब्राह्मणः अतिथिरूपेण गृहं आगच्छति स्म अतः तम् "अतिथि" इति अभिहितम् इति अपि उक्तम्।

यज्ञे देवेभ्यः दीयमानानि हवींषि अग्निना एव समर्प्यन्ते। श्रुति - स्मृतिषु **"अग्निमुखा वै देवाः" (आश्व.गृ.सू 4-8-6) इति, तथा च "पूर्णादर्विपरापत सपूर्णा पुनरापत" वस्नेव विक्रीणा वहाऽइषमूर्जं शतक्रतो।।** (शु.य.सं 3-57) इति वचनेन देवताः अग्निरूपेण दृवनाङ्ग द्रव्याणि स्वीकृत्य तृप्तिं प्राप्नुवन्ति। अग्निः देवानां समीपं हवींषि निरन्तरं नयति अतः सदैव सञ्चरण-स्वभावयुक्तः सन् "अतिथि" इति नाम अग्नये प्रयुक्तम्।

सायणाचार्यः अपि अग्निं "अतिथि" इति द्वयोः अर्थयोः व्याख्यातवान् –

अतिथिवत् नाम अभ्यागतवत् पूज्यः – सततगमनशीलः इति "अतिथि" "आतिथ्य" इति उभे अपि पदे स्वाभाविके प्रसिद्धार्थे प्रयुक्ते। सामान्यतः उपमा सर्वज्ञातायै वस्तुने एव दीयते। अतः ऋग्वैदिक-काले एव अतिथि-सत्कार-आचारः समाजे सुदृढः आसीत् इति स्पष्टम्।

एताभ्यां पदाभ्यां सह **"आतिथिव"** इति पदस्य सायणाचार्यः बहून् अर्थान् उक्तवान्

अतिथिभिः गन्तव्यः, अथवा आतिथ्यार्थाः गावः यस्य सः, स्वर्गः अपि अतिथि – सेवायै प्रयुञ्जानः इत्यादयः -

अतिथि-सत्कारस्य मुख्यः भावः अयम् अस्ति - सर्वे मानवाः भ्रातृभावेन परस्परं सम्बद्धाः सन्ति। अतः परेषां सुख-दुःखे स्वीये इति मत्वा श्रान्ताय, बुभुक्षिताय, पिपासिताय अतिथये आसनं, अन्नं, पानं दातुं प्रत्येकस्य कर्तव्यम्।

अयं भावः केवलं कल्पना नास्ति। ऋग्वेदस्य प्रसिद्धे अन्नसूक्ते अयं विशदं वर्णितः। तत्र स्वार्थम् एव जीवन्तः महापापी इति उक्तम्। तत्र उक्तः मन्त्रः -

**मोघमन्नं विन्दते अप्रचेताः ।**
**सत्यं ब्रवीमि वध इत्स तस्य ।**
**नार्यमणं पुष्यति नो सखायं ।**
**केवलाघो भवति केवलादी ॥** ( ऋ 10-118-6)

**अयमर्थः** - "परैः सह विभज्यं विना एकाकी अन्नं भक्षयन् व्यर्थम् एव भुङ्क्ते। एतत् सत्यम्। सः न बन्धून्, न मित्राणि, न आवश्यकान् च पोषयति। एकाकी भुञ्जानः पापम् एव प्राप्नोति।" इति

तस्मिन् एव सूक्ते धनिकः स्वधनं मित्रैः, बन्धुभिः, आवश्यकैः च विभजेत् इति स्पष्टम् उक्तम्। परोपकारे एव धनस्य वास्तविकं मूल्यं भवति।

ऋग्वेदे उदार-स्वभावानां राज्ञां अतिथिभ्यः, ब्राह्मणेभ्यः, आवश्यकेभ्यः दान-विषये बहवः मन्त्राः सन्ति। तेषां औदार्यं प्रशंसन् बहूनि सूक्तानि रचितानि।

यजुर्वेदे, विशेषतः सोमयाग-प्रसङ्गे "आतिथ्येष्टिः" नाम विशेषः यागः उल्लिखितः। सोमलतां क्रीत्वा यज्ञशालां नीत्वा तां राजवत् सम्मानयित्वा अतिथिवत् स्वागतं कृत्वा आतिथ्येष्टिं कर्तव्यम् इति यजुर्वेदः आदेशयति।

अथर्ववेदे अतिथेः महत्त्वं वर्णयित्वा अतिथि-सत्कार-विधिं यज्ञकर्मभिः सह तुलयित्वा वर्णितम्। अनेन अतिथि-सेवा अपि यज्ञेन समाना पवित्रा कर्तव्या इति ज्ञायते।

अथर्ववेदानुसारम् अतिथौ आगते - स्वागतम् वक्तव्यम्।

हस्त-पाद-प्रक्षालनार्थं जलं दातव्यम् विश्राम-स्थानं, शय्या, उपधानं च दातव्यम्।

स्वादु अन्नं दातव्यम् आवश्यकतायां उपहारः दातव्यः। अतिथिः सम्मानपूर्वकं विसर्जनीयः अतिथिः भोजनात् पूर्वं गृहस्थः भोक्तुं नार्हति इति नियमः अपि उक्तः।

एवम् अतिथिं सत्कृतवते दीर्घायुः, समाजे सम्मानः, मरणानन्तरं दिव्यलोक-प्राप्तिः च इति फलानि अथर्ववेदः कथयति।

अतिथिः भोजनात् पूर्वम् एव यदि गृहस्थः भुङ्क्ते तर्हि सः स्वसम्पदं स्वस्थ्यं च हानिं प्राप्नोति इति विश्वासः आसीत्। अस्मिन् प्रसङ्गे वेद-पारङ्गतः श्रोत्रिय-ब्राह्मणः उत्तमः अतिथिः इति वर्णितः।

समाजात् बहिष्कृतः जनः "व्रात्यः" इति उच्यते। तथापि अथर्ववेदस्य पञ्चदश तमे काण्डे ज्ञानी, सद्गुणसम्पन्नः व्रात्यः अपि सम्माननीयः इति आदेशः अस्ति।

सामान्यतः अतिथिः एकां रात्रिम् एव गृहे तिष्ठति स्म। परन्तु व्रात्यस्य विषये यावन्ति दिनानि गृहे तिष्ठति तावत् अधिकं पुण्यं लभ्यते इति उक्तम्।

ऐतरेयारण्यकस्य अनुसारम् ऐश्वर्यम् इच्छन् वैश्यः "विशो विशो वो अतिथिम्" (ऋग्वेद 8.74) इति मन्त्रं जपेत् इति सूचितम्। अत्र एका शङ्का उत्पन्ना - "अतिथि" इति पदं निर्धनं सूचयति। अतः ऐश्वर्य-इच्छायां तत् कथं सङ्गच्छते इति पूर्वपक्षः। तस्य सिद्धान्तपक्षः उत्तरं ददाति - अतिथिं सम्मानयितुं कारणं तस्य दारिद्र्यं ,नपितु तस्य सद्गुणाः, श्रेष्ठता, धार्मिकता च। अर्थात् अतिथिः निर्धनः अपि सद्गुणी चेत् सम्मानार्हः। एवं च सद्गुण-रहितः धनिकः अपि अतिथित्वेन सम्मानार्हः न। इति भाष्यकाराः प्रति पादितम्

कठोपनिषदि नचिकेतु-कथा द्वारा अतिथि-सत्कार-धर्मः सुन्दररूपेण वर्णितः। नचिकेताः पितुः वचनानुसारम् यमधर्मराजस्य गृहं प्राप्तवान्। परन्तु यमः तदा गृहे नासीत्। नचिकेताः त्रीणि रात्राणि अनशनं कृत्वा प्रतीक्षत।

यमः आगत्य तस्य भार्या सेवकाः च एवम् अवदन् -

"अतिथिः अग्निस्वरूपः। तस्मै पादप्रक्षालन-आसन-भोजनादि सम्मानं न कृतं चेत् सः अग्निवत् गृहस्य पुण्यं दहति।"

अतः यमः नचिकेतसं विधिवत् सत्कृत्य उक्तवान् -

**तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन् ब्रह्मन्नतिथिर्नमस्यः।**
**नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु**
**तस्मात् प्रति त्रीन् वरान् वृणीष्व** ।। क.उ.1.1.19

मुण्डकोपनिषदि अपि अतिथि-सत्कारस्य महत् महत्त्वम् उक्तम्। तत्र अग्निहोत्रं शास्त्रोक्तं न कुर्वन्, विशेषतः अतिथिं न सत्कुर्वन् गृहस्थः स्वपुण्यफलानि हित्वा सप्तलोकानां फलानि नाशयति इति उक्तम्।

एतैः सर्वैः उदाहरणैः स्पष्टं भवति - वेदाः विशेषतः वेदपारङ्गतान् ब्राह्मणान् अतिथिरूपेण सम्मानयितुम् उक्तवन्तः, तथापि अतिथि-सत्कारस्य मूलभावः "सर्वे मानवाः एके" इति ऐक्य-भावः एव।

तैत्तिरीयारण्यके गृहस्थेन प्रतिदिनम् आचरणीयाः पञ्चमहायज्ञाः उक्ताः। तेषु "अतिथि-यज्ञः" अपि प्रमुखः धर्मः इति कथितः।

तैत्तिरीयारण्यके उक्ताः इमे पञ्चमहायज्ञाः सर्वे नित्यकर्माणि। **"पञ्चवा एते महयज्ञाः सतति प्रतायन्ते सतति सन्तिष्ठन्ते देवयज्ञः, पितृयज्ञः, भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति** ”।(तै.आ.2-10-10) - अर्थात् प्रत्येकेन गृहस्थेन प्रतिदिनम् आचरणीयानि कर्तव्यानि। समिधाम् अग्नौ समर्पणेन देवयज्ञः भवति। पिण्ड-जल-दानैः पितृदेवताभ्यः पितृयज्ञः सम्पद्यते। वैश्वदेव-समये काकेभ्यः अन्न-दानात्भूतयज्ञः क्रियते। वैश्वदेवानन्तरम् अतिथये अन्न-दानात् मनुष्ययज्ञः सम्पूर्णः भवति। वेदाध्ययन-वेदपारायणाभ्यां ब्रह्मयज्ञः क्रियते।

अत्र ज्ञातव्यं यत् अतिथये भोजनदानम् एव "मनुष्ययज्ञः" इति उक्तम्। अस्य भावः मानव-समाजं प्रति अस्माकं कर्तव्य-निर्वाहः। मनुस्मृतौ अपि अतिथि-सत्कारः "नृयज्ञः" इति उक्तः।

नित्यकर्मणां विशेषता इयम् - तानि न कृतानि चेत् पापं भवति, परन्तु तानि कृत्वा विशेषं पुण्यफलम् अपि न अपेक्षितव्यम्। तानि फलाकाङ्क्षां विना कर्तव्यानि कर्तव्यानि एव।

तर्हि विशेषफलं न चेत् किमर्थं नित्यकर्माणि कर्तव्यानि इति प्रश्नः। तस्य उत्तरं "ऋण-शोधन" भावे अस्ति। ऋणं परिशोधिते प्रतिफलं न प्राप्नुमः, परन्तु ऋण-मोचनम् एव लाभः। तथैव नित्यकर्माणि अपि अस्माकं उपरि विद्यमानानि ऋणानि शुद्धयितुं उपदिष्टानि।

शतपथब्राह्मणेपि एवं उक्तम् - **ऋणं वै जायते योऽस्ति, सजायमान एव देवेभ्यः ऋषिभ्यः पितृभ्यो मनुष्येभ्यः** (श.ब्रा 1-8-2-1)
मानवः जन्मकाले एव चतुर्भिः ऋणैः सह जायते।
तानि – देव-ऋषि- पितृ- मनुष्य ऋणानि इति ।

**“एतानि ऋणानि शोधयितुं उपायाः” -**

यज्ञ-यागैः देवऋणं शोधयेत्। वेदाध्ययन-स्वाध्यायैः ऋषिऋणं शोधयेत्। सन्तानोत्पादनेन वंश-परम्परया पितृऋणं शोधयेत्। अतिथि-सत्कार-सेवाभावाभ्यां मनुष्यऋणं शोधयेत्।

अनेन स्पष्टं भवति यत् अतिथि-सत्कारः केवलं शिष्टाचारः न, अपितु समाजं प्रति अस्माकं कर्तव्यं निर्वाहयितुं पवित्रः धर्मः।

अयं "ऋण-शोधन" सिद्धान्तः अस्माकं प्राचीन-ऋषीणां गहन-दर्शनं सूचयति। तेषां लक्ष्यं "सर्वे जनाः सुखिनो भवन्तु" इति आदर्शः।

अतः मानवः स्वजीवनं, स्ववृद्धिं च प्रदत्तवतां सर्वेषां प्रति कृतज्ञः भवेत्, सा कृतज्ञता च कर्तव्यरूपेण प्रकटीकर्तव्या इति तैः उपदिष्टम्।

मानवः सामाजिकः प्राणी। सः एकाकी जीवितुं न शक्नोति। कृषिः, वाणिज्यं, विविध-वृत्तयः, कलाः, शिल्पानि च सर्वाणि समाज-सहयोगेन एव अस्माकं जीवनं सुखकरं भवन्ति। अतः समाजं प्रति अपि कृतज्ञता दर्शनीया। समाजस्य प्रतिनिधिरूपेण आगतं अतिथिं सम्मानयित्वा सा कृतज्ञता प्रकटीक्रियते।

अयं कृतज्ञता-भावः अन्यत्र अपि स्पष्टः दृश्यते। तैत्तिरीयारण्यके, तैत्तिरीयोपनिषदि च स्नातकानुशासने आचार्यः शिष्यान् एवम् उपदिशति -

> **मातृदेवो भव। पितृदेवो भव।**
> **आचार्यदेवो भव। अतिथिदेवो भव॥**” (तै.उ-1-11)

भावः - मातरं देवतां मन्यस्व। पितरं देवतां मन्यस्व। आचार्यं देवतां मन्यस्व। अतिथिं देवतां मन्यस्व।

अत्र शिष्येभ्यः मातरं, पितरं, आचार्यं, अतिथिं च देववत्सम्मानयितुं बोधितम्। माता-पितरौ एव अस्माकं जन्म-कारणम्। विशेषतः माता नवनव मासान् गर्भे धृत्वा बहून् कष्टान् सहित्वा अस्मान् पालयति। अतः द्वयोः मध्ये मातृस्थाने प्रथमं स्थानं दत्तम्।

किन्तु शास्त्राणि किमर्थम् एतानि एतावता महत्त्वेन उक्तवन्ति? किमर्थं पुण्य-पापैः सह सम्बद्धानि? किमर्थं कतिपय-प्रसङ्गेषु ब्राह्मणानां, विशेषतः श्रोत्रियाणां एव विशेष-सम्मानः इति उक्तम्? एतेषां प्रश्नानाम् उत्तरम् इदानीं परीक्षणीयम्। प्रत्येकस्मिन् मानवे स्वाभाविकं स्वार्थः, स्वसुख-इच्छा च पशु-भावः अस्ति। अस्मात् स्तरात् तं मानवीयतायै, ततः दैवीयतायै च नयितुं प्राचीन-ऋषयः समाज-स्थैर्यं रक्षितुं बहून् नियमान् रचितवन्तः।

नियमान् रचयितुं सुलभम्। परन्तु जनान् तान् आचरणे पालयितुं कठिनम्। केवलं दण्ड-भयेन जनाः शाश्वतं धर्मं न अनुवर्तन्ते। अतः मानव-मनोविज्ञानं सम्यक् ज्ञातवन्तः ऋषयः जनाः स्वेच्छया धर्मम् आचरेयुः इति शास्त्राणि रचितवन्तः।

प्राचीन-धर्मशास्त्रकाराः मानव-मनोविज्ञानं गहनं ज्ञातवन्तः। अतः तैः एका विशिष्टा सामाजिक-व्यवस्था रचिता। धर्मं बोधयित्वा स्व-जीवनेन आदर्शं स्थापयितुं दायित्वं ब्राह्मणाय अर्पितम्। सः स्व-आचरणेन अन्यान् धर्ममार्गे नयेत् इति अपेक्षितम्।

राजनैतिक-सैनिक-अधिकारः क्षत्रियाणां हस्ते स्थापितः। आर्थिक-व्यवस्था वैश्यानां हस्ते स्थापिता। परन्तु ब्राह्मणाः धनं न सञ्चयेयुः इति नियमः कृतः। अस्य अर्थः ब्राह्मणानां सम्पादन-सामर्थ्यं नास्ति इति न। धर्मम् अनुसृत्य, धन-आसक्तिं विहाय, स्वेच्छया निराडम्बर-जीवनं स्वीकारयितुं तान् आदिष्टवन्तः। तेषां मुख्यानि कर्तव्यानि - वेदाध्ययनम्, अन्येभ्यः बोधनम्, यज्ञ-यागानां करणं कारयणं च, धर्म-प्रचारः। तेषां जीवनोपायः इतरे त्रयः वर्णाः आश्रितः आसीत्। यथा ब्राह्मणाः स्वेच्छया दारिद्र्यं स्वीकुर्युः इति उक्तम् तथैव इतरे वर्णाः ब्राह्मणेभ्यः दान-उपहारान् दद्युः इति प्रोत्साहिताः।

त्यागः मानवम् प्रेरयितुं महती शक्तिः। त्यागः दिव्यः। परन्तु सम्पूर्ण-आत्मसाक्षात्कारेण, क्षण-क्षणं त्यागमय-जीवनं यापनं, निर्धनानां दुःखं समभावेन पश्यनं, कुटुम्बेन सह दारिद्र्यं जीवनशैल्यां स्वीकारणं च उत्तमं तपः। अतः एव ब्राह्मणाय चतुर्णां वर्णानां मध्ये उच्चं स्थानं कल्पितम्। तस्य महत्त्वस्य कारणं जन्म न, अपितु त्यागः, धर्मनिष्ठा, समाज-सेवा च।

सञ्चार-साधनानाम् अभावे अपि अयं चातुर्वर्ण्य-व्यवस्था सहस्र-वर्षाणि यावत् स्थिता इति जनाः तां स्वेच्छया अङ्गीकृतवन्तः इति लेखकस्य मतम्।

शास्त्रेषु अतिथि-सत्कारस्य अर्हः ब्राह्मणः इति उक्ते, तस्य अर्थः जन्मतः ब्राह्मणः न, अपितु कर्मतः ब्राह्मणः। अर्थात् श्रोत्रियः - वेदान् अधीत्य, स्वजीवनं समाज-कल्याणाय, धर्म-रक्षणाय च समर्पितवान्-सः अतिथित्वेन विशेष-सम्मानार्हः।

इतिहासं पश्यामः चेत्, केचन समर्पित-भावनायुक्ताः जनाः अनुशासनेन समाज-कल्याणाय कार्यं कुर्वन्ति चेत् एव सः समाजः उन्नतिं प्राप्नोति इति ज्ञायते। तादृशान् महनीयान् समाजः सम्मानयितुं उचितम्।

एवं च, श्रोत्रियस्य अतिथि-सत्कारः एकः पवित्रः आचारः भूत्वा भारतीय-सामाजिक-व्यवस्थायै बलं अयच्छत् इति वक्तुं शक्यते।

***उपसंहारः***

अनेन निबन्धेन अतिथि-सत्कारः भारतीय-संस्कृतौ अतिप्राचीनः धर्मः। तस्य मूलानि वेद-ब्राह्मण-आरण्यक-उपनिषत्-स्मृतिषु सन्ति। "अतिथि देवो भव" इति भावेन अतिथिं सम्मानयितुं पृष्ठतः वास्तविकः उद्देश्यः मानवता, कृतज्ञता, समाज-प्रति उत्तरदायित्वं, धर्म-पालनं च। अतिथि-सत्कारः केवलं शिष्टाचारः न; सः मनुष्य-यज्ञः, मनुष्यऋण-शोधन-साधनं, समाज-ऐक्यस्य च आधारः इति स्पष्टम्॥

**उपयुक्तग्रन्थसूची –**


1. मनुस्मृतिः
2. महाभारतम्
3. ऋक् संहिता
4. आश्वलायन गृह्यसूत्रम्
5. शुक्लयजुःसंहिता
6. तैत्तिरीय संहिता
7. कठोपनिषत्
8. शतपथ ब्राह्मणम्
9. तैत्तिरीय आरण्यकम्
10. तैत्तिरीय उपनिषत